तृतीयः पाठः

# अस्माकं देशः

## ( भूतकाल की क्रियाएँ )

(हमारा देश भारत अपनी सभ्यता और संस्कृति के कारण एक ओर संसार में अपनी प्राचीनता का गौरव धारण करता है तो दूसरी ओर अत्याधुनिक विकसित देशों के साथ चलते हुए अपने आधुनिक गौरव से भी सम्पन्न है। किसी समय इस देश की सीमाएँ पूर्व-पश्चिम में बहुत बड़े क्षेत्र को व्याप्त करती थी, भले ही आन्तरिक राज्यों की उपस्थिति यदा-कदा संघर्षात्मक भी होती थी, किन्तु आज यह उपमहादेश कई खण्डों में विभक्त हो चुका है । भारतवर्ष के नाम से अवशिष्ट देश अत्यधिक सम्पन्न एवं महत्त्वपूर्ण है । इस पाठ में देश के प्राचीन और आधुनिक दोनों रूपों का यथार्थ निरूपण है।)



उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।

वर्षं तद् भारतं प्राहुः भारती यत्र सन्ततिः ॥

अस्माकं देशः भारतवर्षमिति कथ्यते । प्राचीनकालात् अस्य देशस्य प्राकृतिकी समृद्धिः, साहित्यिकं योगदानं, सांस्कृतिकं वैभवं च आश्चर्यकराणि बभूव । अत्रैव वेदानाम् आविर्भावः सप्तसिन्धुप्रदेशे जातः, यत्र भौतिकम् आध्यात्मिकं च चिन्तनम् अद्भुतम् आसीत् । उत्तरभारते महाकाव्यानां पुराणानां शास्त्राणां च व्यापकता दक्षिणदेशभागमपि स्वप्रकाशे आनयत्। तत्रापि शिलप्पदिकारम् - प्रभृतयः ग्रन्थाः प्राचीनकालतः एव तमिलसाहित्यस्य गौरवं वर्धितवन्तः । सम्पूर्णस्य भारतस्य सांस्कृतिके एकत्वे पुराणानां योगदानम् अविस्मरणीयम् । इदानीं भारतस्य जने-जने धर्मस्थलानां तीर्थयात्रार्थं योऽभिनिवेशः दृश्यते स नूनं पुराणसाहित्यकृतम् । दक्षिणस्य निवासी बदरीकेदारयात्रां करोति, उत्तरस्य निवासी रामेश्वरं कन्याकुमारीतीर्थं च गन्तुमिच्छति । एवमेव द्वारिकाकामाख्यादिषु स्थलेषु गच्छन्ति तीर्थयात्रिकाः ।

अस्य देशस्य नद्यः पुण्यतोयाः मन्यन्ते, पर्वताः पावनाः कथ्यन्ते, वृक्षाः पूज्यन्ते । प्रकृतिं प्रति भारतीयानाम् आश्चर्यकरम् आकर्षणमासीत् । पूजनीयत्वात् प्रकृतेः प्रदूषणं पापं मन्यते स्म । अतएव पर्यावरणस्य कापि समस्या अत्र नासीत् ।

अस्मिन् देशे विज्ञानस्यापि महती प्रतिष्ठा आसीत् । वास्तुशिल्पिनः विशालानि मन्दिराणि निर्मान्ति स्म । भवनानि भव्यानि क्रियन्ते स्म । आकाशपिण्डानि ज्योतिर्विद्भिः अधीयन्ते स्म । अत्र चिकित्साशास्त्रमपि प्रगतिशीलम् । गणितशास्त्रे शून्यस्य कल्पना भारतेन कृता येन दशमलव-गणना प्रारभत, अन्यदेशेष्वपि गता ।

भारतस्य प्राचीनगौरवं मध्यकाले किञ्चित् तिरोहितं पराधीनतया किन्तु सम्प्रति शिक्षिताः सन्तः जनाः आधुनिके विज्ञानेऽपि प्रतिभां दर्शयन्ति । सी. वी. रमण-जगदीशचन्द्र बसु - मेघनाथसाहा - होमी जहांगीर भाभा - विक्रम साराभाई प्रभृतयः वैज्ञानिकाः आधुनिकभारतस्य गौरववर्धकाः । एवं महात्मा-गाँधीसदृशः कर्मवीरः,

रवीन्द्रनाथठाकुरसदृशः साहित्यकारः, अरविन्दसदृशः दार्शनिकः, राधाकृष्णन्सदृशः शिक्षकः, राजेन्द्रप्रसादसदृशः स्थितप्रज्ञः इत्यादयः वर्तमानभारतस्य गौरवरूपाः नेतारः सन्ति ।

सम्प्रति देशस्य विकासः सार्वत्रिकः वर्तते । कृषिक्षेत्रे नवीनाः प्रयोगाः, संचारसाधनानि उत्कृष्टानि अन्तरिक्षक्षेत्रेऽपि विशिष्टं योगदानं स्वास्थ्यं प्रति जनजागरणं, चिकित्सासुविधानां वृद्धिः, सर्वशिक्षाभियानम् इत्यादीनि उल्लेखनीयानि सन्ति। सर्वथापि देशः संसारस्य अग्रगण्येषु गणनीयो वर्तते ।

**शब्दार्थः**

| | | |
|---|---|---|
| **उत्तरम्** | = | उत्तर दिशा में |
| **यत्** | = | जो |
| **समुद्रस्य** | = | समुद्र का / के / की |
| **हिमाद्रेः** | = | हिमालय के |
| **दक्षिणम्** | = | दक्षिण दिशा में |
| **वर्षम्** | = | देश, वर्ष, वृष्टि |
| **भारतम्** | = | भारत (नामक देश) |
| **प्राहुः** | = | कहते हैं |
| **भारती** | = | भारतीय |
| **यत्र** | = | जहाँ |
| **संततिः** | = | संतान |
| **अस्माकम्** | = | हमारा, हमलोगों का |

| | | |
|---|---|---|
| **इति** | = | ऐसा |
| **कथ्यते** | = | कहा जाता है |
| **प्राचीनकालात्** | = | प्राचीन काल से |
| **अस्य** | = | इसका |
| **प्राकृतिकी** | = | प्राकृतिक |
| **समृद्धिः** | = | सम्पन्नता |
| **साहित्यिकम्** | = | साहित्य-संबन्धी |
| **सांस्कृतिकम्** | = | सांस्कृतिक, संस्कृति से सम्बन्धित |
| **वैभवम्** | = | समृद्धि, सम्पन्नता |
| **आश्चर्यकरम्** | = | आश्चर्य उत्पन्न करने वाला |
| **बभूव** | = | था / हुआ |
| **अत्रैव** (अत्र + एव) | = | यहीं |
| **वेदानाम्** | = | वेदों का |
| **आविर्भावः** | = | जन्म, उत्पत्ति |
| **सप्तसिन्धुप्रदेशे** | = | सप्तसैन्धव क्षेत्र में (सिन्धु, झेलम, चेनाब, रावी, व्यास, सतलज व घग्घर (सरस्वती) सात नदियों वाला क्षेत्र) |
| **जातः** | = | हुआ |

**भौतिकम्** = भौतिक, सांसारिक

**आध्यात्मिकम्** = आध्यात्मिक (आत्मा से सम्बन्धित)

**चिन्तनम्** = चिन्तन, मनन

**अद्भुतम्** = अद्भुत (जो आज से पहले न देखा गया हो)

**उत्तरभारते** = उत्तर भारत में

**महाकाव्यानाम्** = महाकाव्यों का

**पुराणानाम्** = पुराणों का

**शास्त्राणाम्** = शास्त्रों का

**व्यापकता** = विस्तार

**दक्षिणम्** = दक्षिण को

**देशभागमपि** (देशभागम् + अपि) = देश के भाग को भी

**स्वप्रकाशे** = अपने प्रकाश में

**आनयत्** = लाया

**तत्रापि** (तत्र + अपि) = वहीं

**शिलप्पदिकारम्** = शिलप्पदिकारम् (तमिल साहित्य का एक महाकाव्य)

**प्रभृतयः** = इत्यादि

**प्राचीनकालतः** = प्राचीन काल से

Developed by: ABSOL www.absol.in

| | | |
|---|---|---|
| **तमिलसाहित्यस्य** | = | तमिल साहित्य का |
| **गौरवम्** | = | गौरव को |
| **वर्धितवन्तः** | = | बढ़ाये हुए हैं |
| **सम्पूर्णस्य** | = | सम्पूर्ण का, समस्त का |
| **भारतस्य** | = | भारत का |
| **सांस्कृतिके** | = | सांस्कृतिक में |
| **एकत्वे** | = | एकता में |
| **अविस्मरणीयम्** | = | नहीं भुलाये जाने योग्य (है) |
| **इदानीम्** | = | इस समय |
| **जने-जने** | = | जन-जन में, लोगों में |
| **धर्मस्थलानाम्** | = | धर्म स्थलों का / की / के |
| **तीर्थयात्रार्थम्** | = | तीर्थ यात्रा के लिए |
| **योऽभिनिवेशः** (यः + अभिनिवेशः) | = | जो लगाव, अभिरुचि |
| **दृश्यते** | = | देखा जाता है |
| **नूनम्** | = | निश्चित रूप से |
| **पुराणसाहित्यकृतम्** | = | पुराण-साहित्य के द्वारा किया गया |
| **दक्षिणस्य निवासी** | = | दक्षिण (भारत) के रहनेवाले |

**बदरीकेदारयात्राम्** = बद्री(नाथ) और केदार(नाथ) की यात्रा (को)

**उत्तरस्य** = उत्तर का

**रामेश्वरं कन्याकुमारीं तीर्थं च** = रामेश्वर और कन्याकुमारी तीर्थ (को)

**गन्तुमिच्छति** (गन्तुम् + इच्छति) = जाना चाहता है

**एवमेव** (एवम् + एव) = उसी प्रकार

**द्वारिकाकामाख्यादिषु** = द्वारिका, कामाख्या आदि में

**स्थलेषु** = स्थलों में / पर

**तीर्थयात्रिकाः** = तीर्थयात्री

**नद्यः** = नदियाँ

**पुण्यतोयाः** = पवित्र जलवाली

**मन्यन्ते** = माने जाते हैं, मानी जाती हैं

**पावनाः** = पवित्र करने वाले

**कथ्यन्ते** = कहे जाते हैं

**पूज्यन्ते** = पूजे जाते हैं

**प्रकृतिं प्रति** = प्रकृति के प्रति

**भारतीयानाम्** = भारतीयों का

**आकर्षणमासीत्** (आकर्षणम्+आसीत्) = आकर्षण था

| | | |
|---|---|---|
| **पूजनीयत्वात्** | = | पूज्य होने (के कारण) से |
| **प्रकृतेः** | = | प्रकृति का |
| **प्रदूषणम्** | = | प्रदूषण |
| **मन्यते स्म** | = | माना जाता था |
| **अतएव** | = | इसीलिए |
| **पर्यावरणस्य** | = | पर्यावरण की |
| **कापि** | = | कोई भी |
| **अत्र** | = | यहाँ |
| **नासीत्** (न + आसीत्) | = | नहीं था |
| **अस्मिन् देशे** | = | इस देश में |
| **विज्ञानस्यापि** (विज्ञानस्य + अपि) | = | विज्ञान का भी |
| **महती** | = | बड़ी |
| **प्रतिष्ठा** | = | इज्जत, सम्मान |
| **वास्तुशिल्पिनः** | = | वास्तुकार - शिल्पकार (भवन का नक्शा बनानेवाले) |
| **विशालानि मन्दिराणि** | = | बड़े मन्दिरों को |

| | | |
|---|---|---|
| **निर्मान्ति स्म** | = | बनाते थे |
| **भवनानि** | = | भवन, मकान |
| **भव्यानि** | = | भव्य, सुन्दर, आकर्षक |
| **क्रियन्ते स्म** | = | बनाये जाते थे |
| **आकाशपिण्डानि** | = | आकाशीय पिण्डों (ग्रह, उपग्रह, नक्षत्रादि) को |
| **ज्योतिर्विद्भिः** | = | ज्योतिषियों के द्वारा |
| **अधीयन्ते स्म** | = | अध्ययन किये जाते थे |
| **चिकित्साशास्त्रमपि** (चिकित्साशास्त्रम् + अपि) | = | चिकित्सा शास्त्र भी |
| **प्रगतिशीलम्** | = | प्रगतिशील, लगातार आगे बढ़नेवाला |
| **गणितशास्त्रे** | = | गणितशास्त्र में |
| **शून्यस्य** | = | शून्य की, (का, के) |
| **भारतेन** | = | भारत के द्वारा |
| **कृता** | = | किया गया |
| **येन** | = | जिससे |
| **दशमलवगणना** | = | दशमलव की गणना (गिनती) |
| **प्रारभत** | = | आरम्भ हुआ |
| **अन्यदेशेष्वपि** (अन्यदेशेषु + अपि) | = | दूसरे देशों में भी |

| | | |
|---|---|---|
| **गता** | = | गयी |
| **किञ्चित्** | = | कुछ |
| **तिरोहितम्** | = | लुप्त, गायब |
| **पराधीनतया** | = | पराधीनता से, गुलामी से, दूसरे के अधीन रहने से |
| **सम्प्रति** | = | इस समय |
| **शिक्षिताः** | = | शिक्षित, पढ़े-लिखे लोग |
| **सन्तः** | = | होते हुए |
| **आधुनिके** | = | आधुनिक में, आज के समय में |
| **विज्ञानेऽपि** (विज्ञाने + अपि) | = | विज्ञान में भी |
| **प्रतिभाम्** | = | प्रतिभा को |
| **दर्शयन्ति** | = | दिखाते हैं |
| **आधुनिकभारतस्य** | = | आधुनिक भारत के |
| **गौरववर्धकाः** | = | गौरव, प्रतिष्ठा, सम्मान बढ़ानेवाले |
| **सदृशः** | = | (के) समान |
| **स्थितप्रज्ञः** | = | जिसने आत्मतत्त्व को जान कर स्थिरता प्राप्त कर ली है (समसुखदुःखः) |
| **इत्यादयः** | = | इत्यादि |
| **वर्तमानभारतस्य** | = | वर्तमान भारत के |

**गौरवरूपाः** = गौरवरूप, प्रतिष्ठा देने वाले

**नेतारः** = नेता (बहुवचन)

**सार्वत्रिकः** = सर्वत्र मिलने वाला

**कृषिक्षेत्रे** = कृषि क्षेत्र में

**नवीनाः प्रयोगाः** = नये प्रयोग

**संचारसाधनानि** = संचार के साधन (यथा– दूरभाष, वायुयान इत्यादि)

**उत्कृष्टानि** = उत्तम

**अन्तरिक्षक्षेत्रेऽपि** (अन्तरिक्षक्षेत्रे + अपि) = अन्तरिक्ष क्षेत्र में भी

**विशिष्टम्** = विशेष

**स्वास्थ्यं प्रति** = स्वास्थ्य के प्रति

**जनजागरणम्** = जन–जागरूकता

**चिकित्सासुविधानां** =चिकित्सा सुविधाओं की

**वृद्धिः** = बढ़ोत्तरी

**सर्वशिक्षाभियानम्** = विद्यालयी शिक्षा के क्षेत्र में उत्थान के लिए चलाया गया कार्यक्रम

**इत्यादीनि** = इत्यादि

**उल्लेखनीयानि** = उल्लेखनीय

**सर्वथापि** (सर्वथा + अपि)= सभी प्रकार से

**अग्रगण्येषु** = अग्रगण्यों में

**गणनीयः** = गणना-योग्य

## व्याकरणम्

### सन्धि-विच्छेदः

| | | |
|---|---|---|
| हिमाद्रेश्चैव | = | हिमाद्रेः + च + एव (विसर्गसन्धिः, वृद्धिसन्धिः) |
| अत्रैव | = | अत्र + एव (वृद्धिसन्धिः) |
| योऽभिनिवेशः | = | यः + अभिनिवेशः |
| नासीत् | = | न + आसीत् (दीर्घसन्धिः) |
| अन्यदेशेष्वपि | = | अन्यदेशेषु + अपि (यण्-सन्धिः) |
| विज्ञानेऽपि | = | विज्ञाने + अपि (पूर्वरूप-सन्धिः) |
| अन्तरिक्षक्षेत्रेऽपि | = | अन्तरिक्षक्षेत्रे + अपि (पूर्वरूप-सन्धिः) |
| सर्वथापि | = | सर्वथा + अपि (दीर्घ-सन्धिः) |

### प्रकृति-प्रत्यय-विभागः

प्राहुः = प्र + लट्लकारः, प्रथमपुरुषः, बहुवचनम्

कथ्यते = + यक् (कर्मवाच्यम्), प्रथमपुरुषः, एकवचनम्

√ब्रू

बभूव = लिट्लकार (परोक्षभूत), प्रथमपुरुषः, एकवचनम्

√कथ्

जातः = जन् + क्त, पुँ0, एकवचनम्

√भू

चिन्तनम् = + ल्युट्

√

आसीत् = लङ्लकारः, प्रथमपुरुषः, एकवचनम्

√चिन्त्

व्यापकता = वि + + ण्वुल् + तल् (ता)

√अस्

आनयत् = आ + लङ्लकारः, प्रथमपुरुषः, एकवचनम्

√आप्

प्राचीनकालतः = प्राचीनकाल + तसिल् (तः)

√नी

वर्धितवन्तः = + णिच्, क्तवतु, बहुवचनम्

विस्मरणीयम् = वि + + अनीयर्, नपुंसकलिङ्गम्

√वृध्

न विस्मरणीयम् – अविस्मरणीयम् (नञ् समास)

√स्मृ

दृश्यते = + यक् (य), प्रथमपुरुषः, एकवचनम् (कर्मवाच्यम्)

कृतम् = + क्त, नपुंसकलिङ्गम्, एकवचनम्

√दृश्

करोति = लट्लकारः, प्रथमपुरुषः, एकवचनम्

√कृ

गन्तुम् = + तुमुन्

√कृ

इच्छति = लट्लकारः, प्रथमपुरुषः, एकवचनम्

√गम्

गच्छन्ति = लट्लकारः, प्रथमपुरुषः, बहुवचनम्

√इष्

मन्यन्ते = + यक् (य), लट्लकारः, प्रथमपुरुषः, बहुवचनम् (कर्मवाच्यम्)

√गम्

कथ्यन्ते = + यक्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् (कर्मवाच्यम्)

√मन्

पूज्यन्ते = + यक्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् (कर्मवाच्यम्)

√कथ्

निर्मान्ति = निर् + लट्लकारः, प्रथमपुरुषः, बहुवचनम्

√पूज्

क्रियन्ते = + यक्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् (कर्मवाच्यम्)

√मा

अधीयन्ते = अधि + +यक् ,लट्लकारः, प्रथमपुरुषः, बहुवचनम् (कर्मवाच्यम्)

√कृ

प्रारभत = प्र + आ + लङ्लकारः, प्रथमपुरुषः, एकवचनम्

गता = √इ क्त, स्त्रीलिङ्गम्, एकवचनम्

दर्शयन्ति = + णिच्, √रभ् लट्लकारः, प्रथमपुरुषः, बहुवचनम्

वर्तते = √गम् लट्लकारः, प्रथमपुरुषः, एकवचनम् (आत्मनेपदी)

## मौखिक :

√दृश्

√वृत्

**1. अधोलिखितानां पदानाम् उच्चारणं कुरुत –**

हिमाद्रेश्च, प्राहुः, साहित्यिकम्, आविर्भावः, शिलप्पदिकारम् अविस्मरणीयम्, योऽभिनिवेशः, द्वारिकाकामाख्यादिषु, पुण्यतोयाः, वास्तुशिल्पिनः, ज्योतिर्विद्भिः, चिकित्साशास्त्रम्, अन्तरिक्षक्षेत्रेऽपि, अग्रगण्येषु ।

**2. निम्नलिखितानां पदानाम् अर्थं वदत –**

अस्माकम्, प्राचीनकालात्, समृद्धिः, वेदानाम्, आध्यात्मिकम्, वर्धितवन्तः, अविस्मरणीयम्, इदानीम्, अभिनिवेशः, गन्तुमिच्छति, पुण्यतोयाः, मन्यन्ते, पूजनीयत्वात्, प्रदूषणम्, आकाशपिण्डानि, ज्योतिर्विद्भिः, अन्यदेशेष्वपि, तिरोहितम्, स्थितप्रज्ञः, सार्वत्रिकः, संचारसाधनानि, जनजागरणम्, सर्वशिक्षाभियानम्, सर्वथापि, गणनीयः ।

**3. भारतवर्षस्य विषये दश वाक्यानि स्वमातृभाषायां वदत ।**

## लिखितः

### 4. अधोलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत –

(क) अस्माकं देशस्य नाम किम् ?

(ख) भारतवर्षं हिमालयस्य (हिमाद्रेः) कस्यां दिशायां वर्तते ?

(ग) भारतस्य दक्षिणदिशायां कः सागरः वर्तते ?

(घ) वेदानाम् आविर्भावः कस्मिन् प्रदेशे जातः ?

(ङ) 'शिलप्पदिकारम्' इति कस्याः भाषायाः महाकाव्यम् ?

(च) कस्मात् कारणात् प्रकृतेः प्रदूषणं पापं मन्यते स्म ?

(छ) आकाशपिण्डानि कैः अधीयन्ते स्म ?

(ज) गणितशास्त्रे शून्यस्य कल्पना केन कृता ?

### 5. समुचितं मेलनं कुरुत –

| | | | | |
|---|---|---|---|---|
| (क) | वेदाः | – | 1. | तमिलमहाकाव्यम् |
| (ख) | भारतवर्षम् | – | 2. | भारतवर्षे |
| (ग) | शिलप्पदिकारम् | – | 3. | ऋक्–यजुः – साम – अथर्व |
| (घ) | शून्यस्य कल्पना | – | 4. | राष्ट्रम् |
| (ङ) | सी. वी. रमणः | – | 5. | दार्शनिकः |
| (च) | श्री अरविन्दः | – | 6. | वैज्ञानिकः |
| (छ) | सर्वशिक्षाभियानम् | – | 7. | स्थितप्रज्ञः |
| (ज) | श्रीराजेन्द्र प्रसादः | – | 8. | शैक्षिकोत्थानकार्यक्रमः |

### 6. कोष्ठकात् पदं चित्वा रिक्तस्थानानि पूरयत –

(क) भारतवर्षं हिमालयस्य ...................... दिशायां वर्तते । (उत्तर, दक्षिण)

(ख) ............ निवासी प्रायेण बदरीकेदारयात्रां करोति । (उत्तरस्य/ दक्षिणस्य)

(ग) भारतस्य गौरवं ............... काले किञ्चित् तिरोहितम् । (प्राचीने, मध्ये)

(घ) डॉ. होमी जहाँगीर भाभा एकः ...................... आसीत् । (वैज्ञानिकः / राजनीतिज्ञः)

(ङ) सम्प्रति राष्ट्रस्य विकासः ....................... । (सार्वत्रिकः / एकाङ्गिकः)

## 7. निम्नलिखितानां प्रश्नानाम् उत्तरं पूर्णवाक्येन लिखत –

(क) अस्माकं देशः किं कथ्यते ?

(ख) वेदानाम् आविर्भावः कस्मिन् प्रदेशे जातः ?

(ग) वेदेषु किम् अद्भुतम् आसीत् ?

(घ) कां प्रति भारतीयानाम् आश्चर्यकरम् आकर्षणमासीत् ?

(ङ) भारतवर्षे के विशालानि मन्दिराणि निर्मान्ति स्म ?

(च) गणितशास्त्रे शून्यस्य कल्पना केन कृता ?

## 8. निम्नलिखितानां पदानां बहुवचनं लिखत –

(क) कथ्यते ..................................

(ख) आसीत् ..................................

(ग) वर्धितवान् ..................................

(घ) करोति ..................................

(ङ) इच्छति ..................................

(च) मन्यते ..............................

(छ) अधीयते ..............................

(ज) गतः ..............................

(झ) दर्शयति ..............................

(ञ) सदृशः ..............................

(ट) वर्तते ..............................

## 9. संस्कृते अनुवादं कुरुत –

(क) हमारा देश 'भारतवर्ष' कहा जाता है।

(ख) यहीं (अत्रैव) सप्तसैन्धव क्षेत्र में वेदों की उत्पत्ति हुई।

(ग) दक्षिण के निवासी प्रायः बद्रीकेदारनाथ की यात्रा करते हैं।

(घ) उत्तर के निवासी रामेश्वर और कन्याकुमारी की यात्रा पर जाना चाहते हैं।

(ङ) इस देश के पर्वत पवित्र कहे जाते हैं।

(च) इस देश में वृक्ष पूजे जाते हैं।

## 10. पदानि योजयित्वा लिखत –

(क) भारतवर्षम् + इति = ..............................

(ख) देशभागम् + अपि = ..............................

(ग) गन्तुम् + इच्छति = ..............................

(घ) आकर्षणम् + आसीत् = ..............................

(ङ) चिकित्साशास्त्रम् + अपि = ..............................

## 11. भिन्नप्रकृतिकं पदं चिनुत –

(क) कथ्यते, नीयते, मन्यते, अमन्यत, क्रियते ।

(ख) देशः, ग्रन्थः, तीर्थयात्रिकः, जनः, लता ।

(ग) उत्तरम्, दक्षिणम्, भारतवर्षम्, वृक्षः, प्रदूषणम् ।

(घ) कन्या, कुमारी, नदी, विज्ञानम्, समस्या ।

## 12. अधोलिखितपदेषु प्रकृति-प्रत्ययविभागं कुरुत -

| | | | |
|---|---|---|---|
| **यथा** - पदानि | प्रकृतिः | | प्रत्ययः |
| कथयितुम् | कथ् + | | तुमुन् |
| (क) पठितुम् | ................. | + | ......................... |
| (ख) गन्तुम् | .................. | + | .......................... |
| (ग) हसितुम् | .................. | + | .......................... |
| (घ) द्रष्टुम् | .................. | + | .......................... |
| (ङ) कर्तुम् | .................. | + | .......................... |

## 13. विशेष्य - विशेषणयोः उचितं मेलनं कुरुत -

| विशेष्य - पदानि | विशेषण - पदानि |
|---|---|
| (क) चिन्तनम् | 1. पवित्राः |
| (ख) नद्यः | 2. महती |
| (ग) पर्वताः | 3. नवीनाः |
| (घ) प्रतिष्ठा | 4. पुण्यतोयाः |
| (ङ) प्रयोगाः | 5. अद्भुतम् |

## योग्यता-विस्तार

भारतवर्ष का नाम प्राचीन राजा भरत (दुष्यन्त और शकुन्तला के पुत्र) के नाम पर पड़ा है। वैदिक युग में भरत एक कबीले (समुदाय) का नाम था। ऋग्वेद में उसकी चर्चा अनेक बार हुई है। भरत नाम के अनेक व्यक्ति पुराणों में हैं किन्तु हमारे देश का नाम **भारत** दुष्यन्तपुत्र के कारण ही पड़ा। अंग्रेजी में इसे (India)कहते हैं जो यूनानी शब्द से निकला है। प्राचीन काल में यूनानी लेखक सिन्धु नदी के आसपास के क्षेत्र को 'इन्दुस्' कहते थे, वही आगे चलकर नदीवाचक नाम से देशवाचक नाम हो गया, जैसे संस्कृत साहित्य में राजा के नाम से देश का नाम पड़ गया। शब्दों का अर्थ कालक्रम से बदलता है, यह स्वाभाविक है।

इस पाठ के आरम्भ में जो श्लोक दिया गया है वह विष्णु पुराण का है। विष्णु पुराण तथा भागवत पुराण में भारतवर्ष की महिमा विस्तार से कही गयी है। विष्णु पुराण में एक अन्य श्लोक है –

गायन्ति देवाः किल गीतकानि, धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते, भवन्ति भूयः पुरुषाः सुरत्वात्॥

भारत की ऐसी महत्ता थी कि देवता भी यहाँ जन्म लेने के लिए तरसते थे। यहाँ जलवायु का वैविध्य, प्रदेशों की भिन्नता, पेड़-पौधों का आधिक्य, जल की सुविधा, उर्वरभूमि इत्यादि प्राकृतिक उपादानों का वरदान जम कर मिला है। यही कारण है कि इस देश में भौतिक समृद्धि तथा सारस्वत कार्य के लिए सर्वथा अनुकूल वातावरण मिला। यहाँ के प्राचीन विद्वानों में एक ओर भौतिक विज्ञान के निरीक्षण एवं विकास की क्षमता थी तो दूसरी ओर आध्यात्मिक चिन्तन का उत्कर्ष भी था। विदेशियों की दृष्टि भारत की अपार प्राकृतिक सम्पदा पर आरम्भ से ही लगी रही थी जिसके कारण यह देश हजारों वर्षों तक राजनीतिक दासता झेलता रहा।

आज स्वाधीन भारत में देश के समक्ष अनेक समस्याएँ हैं जिनका समाधान बहुत दूर तक नागरिकों के शुद्ध आचरण, ज्ञान के प्रति अभिरुचि एवं मिलजुल कर रहने से हो सकता है।

QQQ